**असत्यामृषा अपर्याप्तिका** द्वादश-विधा- (१) आमन्त्रणी (२) आज्ञापनी (३) याचनी (३) पृच्छनी (५) प्रज्ञापनी (६) प्रत्याख्यानी (७) इच्छानुलोमा (८) अनभिगृहीता (९) अभिगृहीता (१०) संशयकरणी (११) व्याकृता (१२) अव्याकृता।

नारक-देव-मनुष्या चतुर्विधामपि भाषन्ते भाषाम्। विकलाऽसत्यामृषाम्। पञ्चे०तिर्यञ्चोऽसत्यामृषाम्, शिक्षापूर्वकमु-

त्तरगुणलब्धिं वा प्रतीत्य चतुर्विधामपि ।

जीव यानि द्रव्याणि भाषातया गृह्णाति, तानि स्थितानि गृह्णाति। द्रव्यतोऽनन्तप्रदेशिकानि, क्षेत्रतोऽसङ्ख्येयप्रदेशावगाढानि, कालत एकाद्यसङ्ख्येयसमयस्थितिकानि, भावतश्च वर्णादिमन्ति गृह्णाति। तानि ग्रहणद्रव्याणि प्रतीत्यैकादिपञ्चवर्णानि, सर्वग्रहणं प्रतीत्य तु नियमात् पञ्चद्रव्याणि। एवं गन्धादीनाश्रित्याप्युह्यम्।

तानि च भाषाद्रव्याणि पृष्टान्यनन्तरावगाढान्यणूनि बादराणि चोर्ध्वमधस्ति-

र्यगादौ मध्ये पर्यवसाने स्वविषयभूतानि गृह्णाति। तान्यप्यानुपूर्व्या नियमात् षड्-दिग्भ्यो सान्तरं निरन्तरं च गृह्णाति। **सान्तरं** गृह्णन् जघन्येनैकं समयमुत्कृष्टेनासङ्ख्येयसमयान् अन्तरं कृत्वा गृह्णाति। **निरन्तरं** गृहणन् जघन्येन समयद्वयमुत्कृष्टेनासङ्ख्येयसमयान् यावदनुसमयमविरहितं निरन्तरं गृह्णाति। निसृजति सान्तरम्, एकसमयेन गृह्णाति, एकसमयेन निसृजति, एवं जघन्येन समयद्वयम्, उत्कृष्टेनासङ्ख्येयसमयिकान्तर्मुहूर्त्तं यावत् ग्रहणनिसर्गौ करोति।

॥ १७ ॥

यदि तानि द्रव्याणि भिन्नानि निसृजति, तदाऽनन्तगुणपरिवृद्ध्या वर्धमानाः स्पृशन्ति लोकान्तम्। यदि त्वभिन्नानि निसृजति, तान्यसङ्ख्येयावगाहनावर्गणा गत्वा भेद-मापद्यन्ते, सङ्ख्येययोजनानि गत्वा च विध्वंसमापद्यन्ते।

तेषां द्रव्याणां **पञ्चविधो भेदः** - (१) **खण्डभेदः**, लोहखण्डादिवत्। (२) **प्रतरभेदः**, वंशवेत्रादिवत्। (३) **चूर्णि-काभेदः**, क्षिप्तपिष्टवत्। (४) **अनुतटि-काभेदः**, इक्षुत्वगादिवत्। (५) **उत्कटि-**

**काभेदः**, एरण्डबीजादिवत्। **अल्प-बहुत्वम्** -

| | |
|---|---|
| उत्कटिकाभेदेन भिद्यमानानि द्रव्याणि | सर्वस्तोकानि |
| अनुत्कटिकाभेदेन भिद्यमानानि द्रव्याणि | अनन्तगुणानि |
| चूर्णिकाभेदेन भिद्यमानानि द्रव्याणि | अनन्तगुणानि |
| प्रतरभेदेन भिद्यमानानि द्रव्याणि | अनन्तगुणानि |
| खण्डभेदेन भिद्यमानानि द्रव्याणि | अनन्तगुणानि |

**षोडशविधं वचनम्** - एकवचनम्, द्विवचनम्, बहुवचनम्, स्त्रीवचनम्, पुंवचनम्, नपुंसकव०, अध्यात्मवचनम्, उपनीतवचनम्, अपनीतवचनम्, उपनीतापनीतवचनम्, अपनीतोपनीतवचनम्,

अतीतवचनम्, प्रत्युत्पन्नवचनम्, अनागतवचनम्, प्रत्यक्षवचनम्, परोक्षवचनम्।

चत्वार्यपि भाषाजातान्यायुक्तं सम्यक् प्रवचनमालिन्यादिरक्षणपरतया भाषमाण आराधकः। तदन्यस्त्वसंयतो विराधकः।

**अल्पबहुत्वम् -**

| | |
|---|---|
| सत्यभाषकाः | सर्वस्तोकाः |
| सत्यामृषाभाषकाः | असङ्ख्येयगुणाः |
| मृषाभाषकाः | असङ्ख्येयगुणाः |
| असत्यामृषाभाषकाः | असङ्ख्येयगुणाः |
| अभाषकाः | अनन्तगुणाः |

(१२) **शरीरपदम्** - पञ्च शरीराणि - औदारिकादीनि। नारकदेवानां शरीरत्रयम् - वैक्रिय-तैजस-कार्मणलक्षणम्। वायुकायिकानां पञ्चे॰ तिरश्चां चाहारकवर्जं चतुष्टयम्। मनुष्याणां पञ्च। शेषाणामौदारिक-तैजस-कार्मणलक्षणं त्रयम्।

बद्धान्यौदारिकशरीराण्यसङ्ख्येयानि, असङ्ख्याभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियन्ते, क्षेत्रतोऽसङ्ख्येया लोकाः। मुक्तानि त्वनन्तानि यावदनन्ता लोकाः। एवं वैक्रियाण्यपि, नवरं बद्धानि क्षेत्रतोऽसङ्ख्येयाः श्रेण्यः, प्रतरस्यासङ्ख्येयभागः। आहार-

कानि बद्धानि स्युर्न वा, यदि स्युस्तदा एकादीन्युत्कृष्टतः सहस्रपृथक्त्वम्, मुक्तान्यौदारिकवत्। तैजसानि बद्धान्यनन्तानि यावदनन्ता लोकाः, द्रव्यतः सिद्धेभ्योऽनन्तगुणाः सर्वजीवानन्तभागोनाः। मुक्तान्यनन्तानि यावदनन्ता लोकाः, द्रव्यतः सर्वजीवेभ्योऽनन्तगुणा जीववर्गस्यानन्तभागे। एवं कार्मणान्यपि। एवं नारकादीनामपि शरीराणि श्रुतानुसारेण यथायोगं ज्ञेयानि।

(१३) **परिणामपदम्** - द्विविधः परिणामः - जीवपरिणामोऽजीवपरिणामश्च।

जीवपरिणामो दशविधः - (१) गतिपरिणामः (२) इन्द्रियपरिणामः (३) कषायपरिणामः (४) लेश्यापरिणामः (५) योगपरिणामः (६) उपयोगपरिणामः (७) ज्ञानपरिणामः (८) दर्शनपरिणामः (९) चारित्रपरिणामः (१०) वेदपरिणामः । अजीवपरिणामो दशविधः (१) बन्धपरिणामः (२) गतिप० (३) संस्थानप० (४) भेदप० (५) वर्णप० (६) गन्धप० (७) रसप० (८) स्पर्शप० (९) अगुरुलघुपरिणामः (१०) शब्दपरिणामः।

(१४) **कषायपदम्** - ४ कषायाः - क्रोधादयः। चतुर्ष्वपि गतिषु कषाय-

चतुष्टयम्। चतुःप्रतिष्ठिताः क्रोधादयः - आत्मपरतदुभयप्रतिष्ठिता अप्रतिष्ठिताश्च। चतुर्भिः स्थानैः क्रोधाद्युत्पत्तिः - क्षेत्रं प्रतीत्य, वस्तु प्रतीत्य, शरीरं प्रतीत्य, उपधिं प्रतीत्य। चतुर्विधाः क्रोधादयः - अनन्तानुबन्ध्याद्याः। यद्वा चतुर्विधाः - आभोगनिर्वर्तितः, अनाभोगनिर्वर्तितः, उपशान्तः, अनुपशान्तश्च। क्रोधादि-स्थानचतुष्टयेन जीवानामष्टकर्मप्रकृतीनां चय उपचयो बन्ध उदीरणा वेदना निर्जरा च कालत्रयेऽपि।

(१५) **इन्द्रियपदम्** - इन्द्रियाणि पञ्च - श्रोत्रादीनि।

| इन्द्रियम् | संस्थानम् | बाहल्यम्, | पृथक्त्वम् |
|---|---|---|---|
| श्रोत्रम् | कलम्बुकापुष्पवत् | अङ्गुला-सङ्ख्येयभागः | अङ्गुला-सङ्ख्येयभागः |
| चक्षुः | मसूरचन्द्रवत् | अङ्गुला-सङ्ख्येयभागः | अङ्गुला-सङ्ख्येयभागः |
| घ्राणम् | अतिमुक्तकचन्द्रवत् | अङ्गुला-सङ्ख्येयभागः | अङ्गुला-सङ्ख्येयभागः |
| जिह्वा | क्षुरप्रवत् | अङ्गुला-सङ्ख्येयभागः | अङ्गु-लपृथक्त्वम् |
| स्पर्शनम् | नानासंस्थानम् | अङ्गुला-सङ्ख्येयभागः | शरीरप्रमाणम् |

पञ्चापीन्द्रियाण्यनन्तप्रदेशिकानि, असङ्ख्येयप्रदेशावगाढानि।

| **स्पर्शनेन्द्रियम्** | **संस्थानम्** |
|---|---|
| पृथ्वीकायिकानाम् | मसूरचन्द्रवत् |
| अप्० | स्तिबुकबिन्दुवत् |
| तेज० | सूचिकलापवत् |
| वायु० | पताकावत् |
| वनस्पति० | नानासंस्थानम् |

शब्द-गन्ध-रस-स्पर्शविषयाणां स्पृ-ष्टानां वेदनम्, रूपस्य त्वस्पृष्टस्य।

| इन्द्रियम् | जघन्यविषयः | उत्कृष्टविषयः |
| --- | --- | --- |
| श्रोत्रम् | अङ्गुलासङ्ख्येयभागः | १२ योजनानि |
| चक्षुः | अङ्गुलसङ्ख्येयभागः | साधिकं योजनलक्षम् |
| घ्राणम् | अङ्गुलासङ्ख्येभागः | ९ योजनानि |
| जिह्वा | अङ्गुलासङ्ख्येयभागः | ९ योजनानि |
| स्पर्शनम् | अङ्गुलासङ्ख्येयभागः | ९ योजनानि |

| इन्द्रियम् | उपोयगाध्वा | | |
|---|---|---|---|
| | जघन्यः | उत्कृष्टः | जघन्योत्कृष्टः |
| चक्षुः | सर्व० | सर्व० | जघ० सर्व० |
| श्रोत्रम् | विशे० | विशे० | जघ० विशे० |
| घ्राणम् | विशे० | विशे० | जघ० विशे० |
| जिह्वा | विशे० | विशे० | जघ० विशे० |
| स्पर्शनम् | विशे० | विशे० | जघ० विशे० |
| | | | चक्षुः उत्कृ० विशे० |
| | | | यावत् स्पर्शन० उत्कृ० विशे० |

द्विविधानीन्द्रियाणि - (१) **द्रव्येन्द्रियाणि** - ८ - द्वे श्रोत्रे, द्वे नेत्रे, द्वे घ्राणे, जिह्वा, स्पर्शनम्। प्रत्येकनारकस्यातीतद्रव्येन्द्रियाणि - अनन्तानि। बद्धानि - अष्ट। पुरस्तकृतानि - ८/१६/१७/सङ्ख्येयानि/असङ्ख्येयानि/अनन्तानि। एवमन्येषामपि यथायोगं वाच्यानि।

(२) **भावेन्द्रियाणि** - ५ - श्रोत्रादीनि। प्रत्येकनारकस्यातीतभावेन्द्रियाण्यनन्तानि। बद्धानि ५। पुरस्कृतानि ५/१०/११/सङ्ख्येयानि/असङ्ख्येयानि/अनन्तानि। एवन्येषामपि यथायोगं वाच्यानि।

(१६) **प्रयोगपदम्** - प्रयोगः पञ्चदशविदः - सत्यमनःप्रयोगादिः ४ + सत्यवचःप्रयोगादिः ४ + औदारिक-शरीरकायःप्रयोगः + औ० मिश्र शरीरका० + वैक्रियशरीरका० + वै० मिश्रशरीरका० + आहारकशरीरका० + आ० मिश्रशरीरका० + तैजसकार्मणशरीरका०।

| **जीवाः** | **प्रयोगाः** |
|---|---|
| नारकाः | ११ |
| देवाः | ११ |
| वायुकायिकाः | ५ |

| जीवाः | प्रयोगाः |
|---|---|
| शेषैकेन्द्रियाः | ३ |
| विकलाः | ४ |
| पञ्चे.तिर्यञ्चः | १३ |
| मनुष्याः | १५ |

**गतिप्रपातः** - ५ (१) **प्रयोगगतिः** - सत्यमनःप्रयोगगतिरित्यादिकाः पञ्च-दशविधा। (२) **ततगतिः** - यो ग्रामादिं प्रति सम्प्रस्थितोऽसम्प्राप्तोऽन्तरा वर्तते, तस्यैकैकस्मिन् पदन्यासे तत्तद्देशान्तरप्राप्ति-लक्षणा गतिः। (३) **बन्धनच्छेदनगतिः** -

जीवेन विमुक्तस्य शरीरस्य, शरीराद्वा विच्युतस्य जीवस्य। (४) **उपपातगतिः** - त्रिविधाः - क्षेत्रोपपातगतिः, भवोपपातगतिः, नोभवोपपातगतिः (५) **विहायोगतिः** - सप्तदशविधा- स्पृशद्गतिरित्यादिः।

(१७) **लेश्यापदम्** - षड् लेश्याः कृष्णादयः।

| जीवाः | लेश्याः |
| --- | --- |
| नारकाः | ३-कृष्णा, नीला, कपोती |
| पञ्चे. गर्भज.तिर्यञ्चः | ६-कृष्णादयः |
| एकेन्द्रियाः | ४-कृष्णा, नीला, कापोती, तैजसी |
| तेजोवायवः | ३-कृष्णा, नीला, कापोती |
| पञ्चे.सम्मू. तिर्यञ्चः | ३-कृष्णा, नीला, कापोती |
| पञ्चे.सम्मू. मनुष्याः | ३-कृष्णा, नीला, कापोती |
| गर्भज मनुष्याः | ६-कृष्णादयः |

| जीवाः | लेश्याः |
|---|---|
| भवनपतयः | ४-कृष्णा, नीला, कापोती, तैजसी |
| वानमन्तराः | ४-कृष्णा, नीला, कापोती, तैजसी |
| ज्योतिष्काः | १-तैजसी |
| वैमानिकदेव्यः | १-तैजसी |
| वैमानिकदेवाः | ३-तैजसी, पद्मा, शुक्ला |

| जीवाः | अल्पबहुत्वम् |
|---|---|
| शुक्ललेश्याः | सर्वस्तोकाः |
| पद्मलेश्याः | सङ्ख्येयगुणाः |
| तेजोलेश्याः | सङ्ख्येयगुणाः |
| अलेश्याः | अनन्तगुणाः |
| कापोतलेश्याः | अनन्तगुणाः |
| नीललेश्याः | विशे० |
| कृष्णलेश्याः | विशे० |
| सलेश्याः | विशे० |

कृष्णलेश्यनारकावधेर्नीललेश्यनारकावधिज्ञानं विशुद्धतरं भवति। एवमग्रेऽपि द्रष्टव्यम्। जीवो यल्लेश्य उपपद्यते तल्लेश्य उद्वर्त्तते। कृष्णलेश्यस्य २/३/४ ज्ञानानि सम्भवति, एवं यावच्छुक्ललेश्यस्य। एकमपि सम्भवति शुक्ललेश्यस्य-केवलज्ञानम्। सम्भवति लेश्यानामन्यतरलेश्यां प्राप्य भूयो भूयस्तद्रूपतया परिणामः। जीमूतादेरप्यनिष्टतरो वर्णः कृष्णलेश्यायाः, ततः क्रमेण विशुद्ध्यमाना लेश्या यावच्छुक्ललेश्या शङ्खादेरपीष्टतरा। एवमास्वादमाश्रित्यापि यथायोगं ज्ञेयम्। आद्यं

लेश्यात्रयं दुरभिगन्धं सङ्क्लिष्टमप्रशस्तं शीतर्क्षं दुर्गतिगामि च। अन्त्यत्रयं तु तद्विपरीतम्।

कृष्णादिलेश्याः ३/९/२७/८१/२४३/बहुविधपरिणामं परिणमन्ति। (३-जघन्यादि, ९-तेषामपि तारतम्यविवक्षया जघन्यादि ३x ३ = ९ एवमग्रेऽपि द्रष्टव्यम्) कृष्णादिलेश्या अनन्तप्रदेशिका असङ्ख्येयप्रदेशावगाढा। कृष्णलेश्याया अनन्तवर्गणाः, एवं यावच्छुक्ललेश्यायाः। असङ्ख्येयानि कृष्णलेश्यायाः स्थानानि, एवं यावच्छुक्ललेश्यायाः।

| | |
|---|---|
| जघन्य-कापोत-लेश्यास्थानानि-द्रव्यार्थतया | सर्वस्तोकानि |
| जघन्य-नील-लेश्यास्थानानि द्रव्यार्थतया | असङ्ख्येयगुणाः |
| जघन्य-कृष्ण-लेश्यास्थानानि द्रव्यार्थतया | असङ्ख्येयगुणाः |
| जघन्य-तेजो-लेश्यास्थानानि द्रव्यार्थतया | असङ्ख्येयगुणाः |
| जघन्य-पद्म लेश्यास्थानानि द्रव्यार्थतया | असङ्ख्येयगुणाः |
| जघन्य-शुक्ल लेश्यास्थानानि द्रव्यार्थतया | असङ्ख्येयगुणाः |
| उत्कृष्ट कापोतलेश्यास्थानानि द्रव्यार्थतया | असङ्ख्येयगुणाः |
| उत्कृष्ट नील लेश्यास्थानानि द्रव्यार्थतया | असङ्ख्येयगुणाः |
| उत्कृष्ट कृष्ण लेश्यास्थानानि द्रव्यार्थतया | असङ्ख्येयगुणाः |

| | |
|---|---|
| उत्कृष्ट तेजो लेश्यास्थानानि द्रव्यार्थतया | असङ्ख्येयगुणाः |
| उत्कृष्ट पद्म लेश्यास्थानानि द्रव्यार्थतया | असङ्ख्येयगुणाः |
| उत्कृष्ट शुक्ल लेश्यास्थानानि द्रव्यार्थतया | असङ्ख्येयगुणाः |
| जघन्य कापोत लेश्यास्थानानि प्रदेशार्थतया | अनन्तगुणा |
| जघन्य नील लेश्यास्थानानि प्रदेशार्थतया | असङ्ख्येयगुणाः |
| जघन्य कृष्ण लेश्यास्थानानि प्रदेशार्थतया | असङ्ख्येयगुणाः |
| जघन्य तेजो लेश्यास्थानानि प्रदेशार्थतया | असङ्ख्येयगुणाः |
| जघन्य पद्म लेश्यास्थानानि प्रदेशार्थतया | असङ्ख्येयगुणाः |
| जघन्य शुक्ल लेश्यास्थानानि प्रदेशार्थतया | असङ्ख्येयगुणाः |

| | |
|---|---|
| उत्कृष्ट कापोत लेश्यास्थानानि प्रदेशार्थतया | असङ्ख्येयगुणाः |
| उत्कृष्ट नील लेश्यास्थानानि प्रदेशार्थतया | असङ्ख्येयगुणाः |
| उत्कृष्ट कृष्ण लेश्यास्थानानि प्रदेशार्थतया | असङ्ख्येयगुणाः |
| उत्कृष्ट तेजो लेश्यास्थानानि प्रदेशार्थतया | असङ्ख्येयगुणाः |
| उत्कृष्ट पद्म लेश्यास्थानानि प्रदेशार्थतया | असङ्ख्येयगुणाः |
| उत्कृष्ट शुक्ल लेश्यास्थानानि प्रदेशार्थतया | असङ्ख्येयगुणाः |

देवनैरयिकानां कृष्णादिलेश्या नान्यलेश्यारूपेण परिणमति, अपि तु तदाकारभावं तत्प्रतिबिम्बभावं वा भजते, देवनारकाणां पूर्वभवीयचरमान्तर्मुहूर्त्तादारभ्य परभवीयप्रथमान्तर्मुहूर्त्तं यावदवस्थितलेश्याकत्वात्। सम्भवति कृष्णलेश्यमनुष्येण नीललेश्यगर्भजननम्, एवं सर्वलेश्यानां मिथः संवेधो ज्ञेयः।

(१८) **कायस्थितिपदम्** - जीवो जीवतया सर्वकालं भवति। नारको नारकतया जघन्यतो १०००० वर्षाणि, उत्कृष्टतः ३३ सागराः। एवं देवो

देवतयाऽपि। अन्येषामपि कायस्थिति-र्जीवाभिगमवन्नेया।

(१९) **सम्यक्त्वपदम्** - जीवा सम्यदृष्टयोऽपि, मिथ्यादृशोऽपि, मिश्र-दृशोऽपि। एवं नारका देवास्तिर्यक्पञ्चेन्द्रिया मनुष्याश्च। एकेन्द्रिया मिथ्यादृशः। विकलाः सम्यग्दृशो मिथ्यादृशो वा। सिद्धाः सम्यग्दृशः।

(२०) **अन्तक्रियापदम्** - कश्चिज्जी-वोऽन्तक्रियां कुर्यात्, कश्चित्तु न। नारको नारकेष्वन्तक्रियां न कुर्यात्, नाप्यसुर-

कुमारेषु। एतेनाभिलापेन सर्वप्रतिषेधः, नवरं मनुष्येषु कश्चित् कुर्यात्, कश्चिन्न। एवमसुरकुमारादेरपि वाच्यम्।

नारका अनन्तराऽऽगता अपि कुर्वन्त्यन्तक्रियाम्, परम्पराऽऽगता अपि। एवं रत्नप्रभानारका यावत् पङ्कप्रभानारकाः। धूमप्रभादिनारकास्तु नानन्तरागताः कुर्वन्त्यन्तक्रियाम्, अपि तु परम्परागताः। एवं तेजो-वायु-विकला अपि। शेषास्त्वनन्तरागता अपि परम्परागता अपि च कुर्वन्त्यन्तक्रियाम्।

| अनन्तरागता | एकसमये जघन्यतः अन्त-क्रियाकारकाः | उत्कृष्टतः अन्तक्रि-याकारकाः |
|---|---|---|
| रत्नप्रभानारकाः | १ | १० |
| शर्कराप्रभाःनारकाः | १ | १० |
| वालुकाप्रभाःनारकाः | १ | १० |
| पङ्कप्रभाः नारका | १ | ४ |
| भवनपति देवाः | १ | १० |
| भवनपति देव्यः | १ | ५ |
| पृथ्वीकायिकाः | १ | ४ |
| अप्कायिकाः | १ | ४ |
| वनस्पतिकायिकाः | १ | ६ |

| अनन्तरागता | एकसमये जघन्यतः अन्त-क्रियाकारकाः | उत्कृष्टतः अन्तक्रि-याकारकाः |
|---|---|---|
| पञ्चे० तिर्यञ्चपुरुषाः | १ | १० |
| पञ्चे० तिर्यञ्चस्त्रियः | १ | १० |
| मनुष्याः | १ | १० |
| मानुष्यः | १ | २० |
| वानमन्तराः | १ | १० |
| वानमन्तर्यः | १ | ५ |
| ज्योतिष्कदेवाः | १ | १० |
| ज्योतिष्कदेव्यः | १ | २० |
| वैमानिकदेवाः | १ | १०८ |
| वैमानिकदेव्यः | १ | २० |

तेजोवायुकायिकानां मनुष्येषूत्पादासम्भवः, तिर्यक्पञ्चेन्द्रियेषूत्पन्नानां सम्भवति तेषां केवलिप्रज्ञप्तधर्मश्रुतिः, न तु बोधिलाभः, सङ्क्लिष्टपरिणामत्वात्। विकलानां सम्भवति मनुष्येष्वनन्तरमुत्पन्नानां मनःपर्यवज्ञानलाभः। आद्यनरकत्रयादागतानां सम्भवति तीर्थकृत्त्वम्। चतुर्थ्या आगतानां सम्भवति केवलित्वम्, पञ्चम्याः सर्वविरतिः, षष्ठ्या देशविरतिः, सप्तम्याः सम्यक्त्वम्, असुरकुमारादेरन्तक्रिया, सौधर्मादेस्तीर्थकरत्वम्।

चक्रवर्तित्वं रत्नप्रभानैरयिकभवन-पति-व्यन्तरज्योतिष्कवैमानिकेभ्यः। बल-देववासुदेवत्वे शर्करातोऽपि, नवरं वैमा-निकेभ्योऽनुत्तरोपपातवर्जेभ्यः। मण्डलिक-त्वमधःसप्तमतेजोवायुवर्जेभ्यः शेषेभ्यः सर्वेभ्योऽपि स्थानेभ्यः। सेनापतिरत्नत्वं गाथापतिरत्नत्वं वर्द्धकिरत्नत्वं पुरोहित-रत्नत्वं स्त्रीरत्नत्वं चाधःसप्तमपृथिवीतेजो-वायुअनुत्तरोपपन्नदेववर्जेभ्यः शेषेभ्यः, स्थानेभ्यः।

अश्वरत्नत्वहस्तिरत्नत्वे रत्नप्रभात

आरभ्य निरन्तरं यावदासहस्रारात्। चक्ररत्नत्व छत्ररत्नत्वं चर्मरत्नत्वं दण्डरत्नत्वमसिरत्नत्वं मणिरत्नत्वं काकणिरत्नत्वं चासुरकुमारादारभ्य निरन्तरं यावदीशानात्।

तापसादीनामुपपातवक्तव्यता ज्ञेयौपपातिकानुसारेण।

| असञ्ज्ञिजीवस्य | जघन्यबन्धः | उत्कृष्टबन्धः |
| --- | --- | --- |
| देवायुषः | १०,००० वर्षाणि | पल्योपमासङ्ख्येयभागः |
| नारकायुषः | १०,००० वर्षाणि | पल्योपमासङ्ख्येयभागः |
| तिर्यगायुषः | अन्तर्मुहूर्त्तम् | पल्योपमासङ्ख्येयभागः |
| मनुष्यायुषः | अन्तर्मुहूर्त्तम् | पल्योपसमासङ्ख्येयभागः |

| | |
| --- | --- |
| असञ्ज्ञिनो देवायुः | सर्वस्तोकम् |
| असञ्ज्ञिनो मनुष्यायुः | असङ्ख्येयगुणाः |
| असञ्ज्ञिनो तिर्यगायुः | असङ्ख्येयगुणाः |
| असञ्ज्ञिनो नरकायुः | असङ्ख्येयगुणाः |

(२१) **शरीरपदम्** - शरीरपञ्चकम्-औदारिकादि।

(१) **औदारिकं** पञ्चविधम्- एकेन्द्रियौदारिकशरीरं यावत् पञ्चेन्द्रियौदारिकशरीरम्। एकेन्द्रिय० पञ्चविधम्- पृथ्वीकायिकैकेन्द्रियौदारिकशरीरं यावद् वन०। एवं जीवभेदाननुसृत्य शरीरभेदा उपयुज्य वाच्याः। एवं संस्थानान्यपि पृथ्वीकायादेः प्रागुक्तानुसारेण वाच्यानि। विकलानां हुण्डसंस्थानम्। मनुष्याः तिर्यक्पञ्चे०-षट् संस्थानानि। सम्मूर्च्छिमानां सर्वेषां हुण्डम्। औदारिकावगाहना जघन्यतोऽङ्गुलास-

ङ्ख्येयभागः, उत्कृष्टतः साधिकयोजन-सहस्रम्। पृथ्वीकायादीनां यथायोग्यं वा-च्याऽवगाहना।

(२) **वैक्रियं** द्विविधम् - एके-न्द्रियवैक्रियं पञ्चे० वैक्रियम्। आद्यं पर्याप्तबादरवायुकायिकैकेन्द्रियवैक्रियशरीरम्। द्वितीयं चतुर्गतिष्वपि यथायोगं ज्ञेयम्। वायुकायिकानां पताकासंस्थानम्, पञ्चे० नानासंस्थानम्। नारकाणां भवधारणीय-मुत्तरवैक्रियं च हुण्डम्। देवानां भवधारणीयं समचतुरस्रम्, अपरं नानासंस्थानम्। वैक्रि-यावगाहना जघन्यतोऽङ्गुलासङ्ख्येय-

भागः, उत्कृ. साधिकयोजनलक्षम्। एवं तत्तच्छरीरिभेदानामपि यथायोगं वाच्या।

(३) **आहारकं** एकविधम्। तच्च ऋद्धिप्राप्तत्वादिविशिष्टसंयतस्य समचतुरस्रं जघन्यतो देशोनरत्निप्रमाणम्, उत्कृष्टतः प्रतिपूर्णरत्निप्रमाणम्।

(४) **तैजसं** पञ्चविधम् - एके० तै० यावत् पञ्चे० तै०। तच्च नानासंस्थानसंस्थितम्, औदारिकादिवत् संस्थानं वाच्यम्।

| मारणान्तिकसमुद्घातसमवहतः | जघन्यतैजसावगाहना | उत्कृष्टतैजसावगाहना |
|---|---|---|
| जीवः | (विष्कम्भबाहल्यतः शरीरप्रमाणा ।) आयामतः अङ्गुलासङ्ख्येयभागः | लोकान्ताल्लोकान्तः |
| एकेन्द्रियः | ,, | लोकान्ताल्लोकान्तः |
| द्वीन्द्रियः | ,, | तिर्यग्लोकान्ताल्लोकान्तः |
| त्रीन्द्रियः | ,, | तिर्यग्लोकान्ताल्लोकान्तः |
| चतुरिन्द्रियः | ,, | तिर्यग्लोकान्ताल्लोकान्तः |
| पञ्चे तिर्यक् | ,, | तिर्यग्लोकान्ताल्लोकान्तः |

| मारणान्तिकसमुद्धातसमवहतः | जघन्यतैजसावगाहना | उत्कृष्टतैजसावगाहना |
|---|---|---|
| नारकः | साधिकं योजनसहस्रम् | अधः-तमस्तमा तिर्यक्-स्वयम्भूर० ऊर्ध्वं-पण्डकवनपुष्करिण्यः। |
| मनुष्यः | | समयक्षेत्राल्लोकान्तः |
| असुरादयः<br>वानमन्तराः<br>ज्योतिष्काः | विष्कम्भबाहल्यतः शरीरप्रमाणा आयामतः-जघ-अङ्गुलासङ्ख्येयभागः | अधः-तृतीयपृथ्व्यधस्तनचरमान्तः तिर्यक्-स्वयम्भूरमणसागरबाह्यवेदिकान्तः ऊर्ध्वमीषत्प्राग्भारा पृथ्वी |

| मारणान्तिकसमुद्घातसमवहतः | जघन्यतैजसावगाहना | उत्कृष्टतैजसावगाहना |
|---|---|---|
| सौधर्मेशानदेवाः | विष्कम्भबाहल्यतः शरीरप्रमाणा आयामतः-जघ-अङ्गुलासङ्ख्येयभागः | ,, |
| सनत्कुमारादिदेवाः | विष्कम्भबाहल्यतः शरीरप्रमाणा आयामतः-जघ-अङ्गुलासङ्ख्येयभागः | अधः महापातालकलशानां द्वितीय-त्रिभागः तिर्यक् - स्वयम्भूरमणसमुद्रः ऊर्ध्वं - अच्युतकल्पः |

| मारणान्तिकसमुद्घातसमवहतः | जघन्यतैजसावगाहना | उत्कृष्टतैजसावगाहना |
|---|---|---|
| आनतादिदेवाः | विष्कम्भबाहल्यतःशरीरप्रमाणा<br>आयामतः-जघ-<br>अङ्गुलासङ्ख्येयभागः | अधः-अधोलौकिकग्रामाः<br>तिर्यक्-मनुष्यक्षेत्रम्<br>ऊर्ध्वम्- अच्युतकल्पः |
| अच्युतदेवाः | विष्कम्भबाहल्यतःशरीरप्रमाणा<br>आयामतः-जघ-<br>अङ्गुलासङ्ख्येयभागः | ऊनवरं<br>ऊर्ध्वम्- स्वविमानानि |
| ग्रैवेयकदेवाः | वि.बा.-शरीरप्रमाणा<br>आयामतः - विद्याधरश्रेण्यः | अधः-अधोलौकिकग्रामाः<br>तिर्यक्-समयक्षेत्रम् |

| मारणान्तिकसमुद्घातसमवहतः | जघन्यतैजसावगाहना | उत्कृष्टतैजसावगाहना |
|---|---|---|
| अनुत्तरदेवाः | वि.बा.-शरीरप्रमाणा आयामतः - विद्याधरश्रेण्यः | ऊर्ध्वम्- स्वविमानानि<br>अधः-अधोलौकिकग्रामाः<br>तिर्यक्-समयक्षेत्रम्<br>ऊर्ध्वम्- स्वविमानानि |

## (५) **कार्मणं** तैजसवत्।

| | | |
|---|---|---|
| आहारकशरीराणि | द्रव्यार्थतया | सर्वस्तोकानि |
| वैक्रियशरीराणि | द्रव्यार्थतया | असङ्ख्येयगुणा |
| औदारिकशरीराणि | द्रव्यार्थतया | असङ्ख्येयगुणा |
| आहारकशरीराणि | प्रदेशार्थतया | अनन्तगुणाः |
| वैक्रियशरीराणि | प्रदेशार्थतया | असङ्ख्येयगुणाः |
| औदारिकशरीराणि | प्रदेशार्थतया | असङ्ख्येयगुणाः |
| तै.का.शरीराणि | द्रव्यार्थतया | अनन्तगुणाः |
| तैजसशरीराणि | प्रदेशार्थतया | अनन्तगुणाः |
| कार्मणशरीराणि | प्रदेशार्थतया | अनन्तगुणाः |

| | |
|---|---|
| औदारिकशरीरस्य जघन्या अवगाहना | सर्वस्तोका |
| तै.का.शरीरस्य जघन्या अवगाहना | विशे॰ |
| वैक्रियशरीरस्य जघन्या अवगाहना | असङ्ख्येयगुणाः |
| आहारक शरीरस्य जघन्य अवगाहना | असङ्ख्येयगुणाः |
| आहारकशरीरस्य उत्कृष्टा अवगाहना | विशे॰ |
| औदारिक शरीरस्य उत्कृष्टा अवगाहना | सङ्ख्येयगुणाः |
| वैक्रियशरीरस्य उत्कृष्टा अवगाहना | सङ्ख्येयगुणाः |
| तै.का.शरीरस्य उत्कृष्टा अवगाहना | असङ्ख्येयगुणाः |

(२२) **क्रियापदम्** - पञ्च क्रियाः कायिक्याद्याः

(१) **कायिकी** - २ अनुपरतकायिकी, दुष्प्रयुक्तकायिकी

(२) **आधिकरणिकी** - २ संयोजनाधिक०, निर्वर्तनाधिक०

(३) **प्राद्वेषिकी** - ३ - आत्म-पर-उभयगोचराशुभमनः सम्प्रधारणम्

(४) **पारितापनिकी** - ३- आत्म-पर-उभयअसातोदीरणम्।

(५) **प्राणातिपात** - ३- आत्म-पर-उभयजीवितव्यपरोपणम्।

यद्वा पञ्च क्रियाः - आरम्भिक्यादयः।

(१) **आरम्भिकी** - अन्यतरस्यापि प्रमत्तसंयतस्य

(२) **पारिग्रहिकी** - अन्यतरस्यापि देशविरतस्य

(३) **मायाप्रत्ययिकी** - अन्यतरस्यापि अप्रमत्तसंयतस्य

(४) **अप्रत्याख्यानिकी** - अन्यतरस्यापि अविरतस्य

(५) **मिथ्यादर्शनप्रत्यया** - अन्यतरस्यापि मिथ्यादृष्टेः

नारकाणां यावद् वैमानिकानां पञ्च क्रियाः। यस्य जीवस्याऽऽरम्भिकी क्रिया क्रियते, तस्य पारिग्रहिकी स्यात् क्रियते, स्यान्न क्रियते, यस्य पुनः पारिग्रहिकी क्रिया क्रियते तस्याऽऽरम्भिकी क्रिया नियमात् क्रियत इत्यादि यथायोगं संवेधो द्रष्टव्यः। नारक-देवानां क्रियाचतुष्कमवश्यं क्रियते, पञ्चमी भजनया। एवमन्येषामपि क्रिया, तत्तत्क्रियाभावे तद्विधकर्मबन्धकत्वं च ज्ञेयम्।

| | |
|---|---|
| मिथ्यादर्शनप्रत्ययाः क्रियाः | सर्वस्तोकाः |
| अप्रत्या० क्रियाः | विशे० |
| पारिग्र० क्रियाः | विशे० |
| आरम्भिक्यः क्रियाः | विशे० |
| मायाप्र० क्रियाः | विशे० |

(२३) **कर्मप्रकृतिपदम्** - कर्मप्रकृतयः - ८ ज्ञानावरणादयः। नारकाणां यावद् वैमानिकानां ८ कर्मप्रकृतयः। ज्ञानावरणोदयेन जीवो दर्शनावरणं निर्गच्छति, दर्शनावरणोदयेन दर्शनमोहनीयं कर्म निर्गच्छति, तदुदयेन

मिथ्यात्वं निर्गच्छति, मिथ्यात्वोदयेन चाष्टकर्मप्रकृतिबन्धः।

ज्ञानावरणबन्धो रागेण द्वेषेण च, रागो द्विविधः - माय लोभश्च, द्वेषो द्विविधः - क्रोधो मानश्च। वीर्योपगृहीतैतच्चतुष्टयेन ज्ञानावरणबन्धः। **ज्ञानावरणकर्मानुभावो** दशविधः, तद्यथा - श्रोत्रावरणं श्रोत्र-विज्ञानावरणं यावत् स्पर्शावरणं स्पर्श-विज्ञानावरणम्। **दर्शनावरणानुभावो** नव-विधः - निद्रादिः। **सातवेदनीयानुभावो**-ऽष्टविधः - मनोज्ञाः शब्दादयः, मनोवा-क्कायसुखता च। **असातवेदनीयानुभावो**

नवविधः - अमनोज्ञाः शब्दादयः, मनो-वाक्काय-दुःखता च। **मोहनीयानुभावः** पञ्चविधः - सम्यक्त्ववेदनीयः, मिथ्यात्व-वेदनीयः, सम्यङ्मिथ्यात्ववे०, कषाया-वेदनीयः, नोकषायवेदनीय। **आयुरनुभावः** - चतुर्विधः - नैरयिकाद्यायुः। **शुभनाम-कर्मानुभावः** - १४ विधः - इष्टाः शब्दादयः, इष्टा गतिः स्थितिर्लावण्यं यशः कीर्त्तिरुत्थानादिः स्वरता च, कान्तस्वरता, प्रियस्वरता, मनोज्ञस्वरता। **अशुभनाम-कर्मानुभावः** - उक्तविपरीतः। **उच्चगोत्र-कर्मानुभावः** - ८ - जात्यादिविशिष्टता-

रूपः। नीचैर्गोत्रकर्मानुभावः - ८ जात्यादिहीनतारूपः। अन्तरायानुभावः - ५ दानाद्यन्तरायरूपः। ज्ञानावरणीयं पञ्चविधम् - आभिनिबोधिकज्ञानावरणीयादि। एवं सर्वेषां भेदाः प्रभेदाश्च वाच्याः, तत्तत्कर्मस्थितिस्तत्तज्जीवप्रायोग्यस्थितिबन्धश्च।

| **कर्म** | **जघन्यस्थितिबन्धकः** |
|---|---|
| ज्ञानावरणीयम् | क्षपक उपशमको वा सूक्ष्मसम्परायः |
| मोहनीयम् | क्षपक उपशमको वा बादरसम्परायः |
| आयुः | असङ्क्षेप्याध्वप्रविष्टः |

सञ्ज्ञी पञ्चे॰ सर्वपर्याप्तिभिः पर्याप्तः

साकारो जागरः श्रुतोपयुक्तो मिथ्यादृष्टिः कृष्णलेश्य उत्कृष्टसङ्क्लिष्टपरिणाम इषन्मध्यमपरिणामो जीवो नारकेषु देवेषु **चोत्कृष्टस्थितिबन्धकः**। तिर्यक्षु कर्मभूमकः कर्मभूमकप्रतिभागी वा सञ्ज्ञी पञ्चे. सर्वपर्याप्तिभिः पर्याप्तः, शिष्ट नारकवत्। एवं मनुष्येष्वपि। उत्कृष्टस्थितिबन्धको न नारकः, नापि देवः, अपि तूक्तविशेषणविशिष्टः परमकृष्णलेश्य उत्कृष्टसङ्क्लिष्टपरिणामः तिर्यक्। मनुष्येषु तु सम्यग्दृष्टिर्मिथ्यादृष्टिर्वा कृष्णलेश्यो वा शुक्ललेश्यो वा ज्ञान्यज्ञानी वा सङ्क्लिष्टपरि-

णामो वाऽसङ्क्लिष्टपरिणामो वा तत्प्रा-योग्यविशुद्ध्यमानपरिणामो वा। शेषकर्मो-त्कृष्टस्थितिबन्धको ज्ञानावरणीयवत्।

(२४) **कर्मप्रकृतिबन्धपदम्** - जीवो ज्ञानावरणीयं बध्नन् ७/८/६ कर्म-प्रकृतीः बध्नाति। अत्रैकानेकापेक्षया संवेधो द्रष्टव्यः। एवं दर्शनावरणीयं बध्नतोऽपि। वेदनीयं बध्नन् ७/८/६/१, मोहनीयं बध्नन् ७/८, आयुर्बध्नन् ८, नामगोत्रान्तरायाण्याश्रित्य ज्ञानावरणीयवत्।

(२५) **कर्मवेदपदम्** - ज्ञानावरणीयं बध्नन् नियमादष्टकर्मप्रकृतीर्वेदयति। वेदनीयं बध्नन् ७/८/४। शेषकर्माणि

बध्नन् ८। नारका यावद्वै-मानिका नियमादृष्टविधकर्मवेदकाः।

(२६) **कर्मवेदबन्धपदम्** - ज्ञानावरणीयं वेदयन् ७/८/६/१ बध्नाति। वेदनीयं वेदयन् ७/८/६/१/०। एवमायुर्नामगोत्राण्यपि। मोहनीयं ज्ञानावरणीयवत्। एकानेकसंवेधो ज्ञेयः।

(२७) **कर्मप्रकृतिवेदवेदपदम्** - ज्ञानावरणीयं वेदयन् ७/८ वेदयति। एवं दर्शनावरणीयान्तरायेऽपि वेदनीयायुर्नामगोत्राणि वेदयन् ८/७/४ वेदयति। मोहनीयं वेदयन् ८ वेदयति।

(२८) **आहारपदम्** - नारका देवा-

श्चाऽचित्तहाराः। शेषाः सचित्ताहारा अपि अचित्ताहारा अपि, मिश्राहारा अपि। नारकाणां देवानां चानाभोगनिर्वर्तित आहारार्थोऽनुसमयम्। आभोगनि० नारकाणामाहारार्थोऽसङ्ख्येयसमयिकान्तर्मौहूर्तिकः, देवानां दिवसपृथक्त्वेनाहारार्थो जघन्यतः, उत्कृ० यथायोगं ज्ञेयः। ते च द्रव्यतोऽनन्तप्रदेशिकानीत्यादि भाषाद्रव्यवज्ज्ञेयम्। आहारतया गृहीतानां पुद्गलानां तेऽसङ्ख्येयभागमाहारयन्ति, अनन्तभागमास्वादयन्ति। नारकाणां ते श्रोत्रादितयाऽनिष्टतया दुःखतया च परिणमन्ति। देवानां तु श्रोत्रादितया मनोज्ञतया सुखतया च

परिणमन्ति।

**पृथ्वीकायिका**नामनुसमयमाहारार्थः। निर्व्याघातं प्रतीत्य दिक्षट्कात् तेषामाहारः। व्याघातं प्रतीत्य तु ३/४/५। ते चाहारतया गृहीताः पुद्गलास्तेषां स्पर्शनेन्द्रियतयेष्टानिष्टतया च परिणमन्ति। शिष्टं नारकवत्। एवं **यावद्वनस्पतिकायिकानाम्**। **द्वीन्द्रियाणा**मनाभोगनिर्वर्तित आहारार्थोऽनुसमयम्, आभोगनिर्वर्तितोऽसङ्ख्येयसमयिकान्तर्मौहूर्त्तिको विमात्रया। द्विविधस्तेषामाहारः - (१) **लोमाहारः** - तत्त्वेन गृहीतं सर्वमाहारति (२) **प्रक्षेपा**-

हारः तत्त्वेन गृहीतस्यासङ्ख्येयभागमाहा-रयति, अनेकभागसहस्राव्यस्पृश्यमानान्य-नास्वाद्यमानानि च विध्वंसमागच्छन्ति। अनास्वाद्यमानाः पुद्गलाः सर्वस्तोकाः, अस्पृश्यमाना अनन्तगुणाः। ते च पुद्गलाः स्पर्शनेन्द्रियतया रसनेन्द्रियतयेष्टानिष्टतया च भूयो भूयः परिणमन्ति। एवं त्रीन्द्रियादेरपि यथायोगं ज्ञेयम्। यावत् सर्वार्थसिद्धदेवा-नामजघन्योत्कृष्टेन ३३ सहस्रवर्षेभ्यः समुत्पद्यत आहारार्थः। देवा मनुष्याः पञ्चेणतिर्यञ्चो नारकाश्च **पूर्वभावप्रज्ञापनां** प्रतीत्यैकेन्द्रियशरीराणि यावत् पञ्चे०

शरीराण्याहारयन्ति, **प्रत्युत्पन्नभाव-प्रज्ञापनां** प्रतीत्य नियमात् पञ्चे॰ श॰ आहारयन्ति।

एकेन्द्रिया पूर्वभावप्र॰ उक्तवत्, प्रत्यु॰ नियमात् एकेन्द्रियश॰ आहारयन्ति। एवं येषां यावन्तीन्द्रियाणि तावन्तीन्द्रियश॰ प्रत्यु॰ आहारयन्ति। नारका देवा एकेन्द्रियाश्च लोमाहाराः, शेषा लोमाहारा अपि, प्रक्षेपाहारा अपि।

देववर्जाः सर्वेऽप्योजआहाराः, न मनोभक्षिणः। देवा ओजआहारा अपि, मनोभक्षिणोऽपि। समुत्पद्यते तेषामिच्छा-

मनः, यथेच्छामो मनोभक्षणं कर्त्तुम्, ततस्तैर्देवैरेवं मनसि कृते सति क्षिप्रमेवेष्टपुद्गलाः परिणमन्ति तेषां मनोभक्षणतया।

(२९) **उपयोगपदम्** - द्विविध उपयोगः, साकारोपयोगोऽनाकारोपयोगश्च। साकारः - ८- ५ ज्ञानोपयोगः, ३ अज्ञानोपयोगः। अनाकारः ४ - चक्षुर्दर्शनानाकारोपयोग इत्यादिः। नारकाणां साकारः - ६, अनाकारः - ३, एवं येषां यावन्त उपयोगास्तावन्तो वाच्याः।

(३०) **पश्यत्तापदम्** - द्विविधा पश्यत्ता - साकाराऽनाकारा च। **साकारा** - ६ श्रुतज्ञानपश्यत्ता, अवधिज्ञा०, मनः प०, केवलज्ञा०, श्रुताज्ञान०, विभङ्गज्ञान०।

**अनाकारा** - ३ - चक्षुर्दर्शनानाकार-पश्यत्ता, अवधिद०, केवलद०। नारकाणां साकारा - ४, अनाकार-२। एवमन्येषामपि यथायोगं वाच्या।

साकारं केवलिनो ज्ञानम्, अनाकारं तद्दर्शनम्, अतः केवली रत्नप्रभादिक-माकार-हेत्वादिभिर्यस्मिन् समये जानाति,

न तस्मिन् समये पश्यति।

(३१) **सञ्ज्ञापरिणामपदम्** - जीवा सञ्ज्ञिनोऽप्यसञ्ज्ञिनोऽपि नोसञ्ज्ञिनोऽसञ्ज्ञिनोऽपि। नारकाः सञ्ज्ञिनोऽप्यसञ्ज्ञिनोऽपि, न नोसञ्ज्ञिनोऽसञ्ज्ञिनः। एवमन्येऽपि यथायोगं वाच्याः।

(३२) **संयमयोगपदम्** - जीवाः संयता अपि, असंयता अपि, संयतासंयता अपि, नोसंयतनोऽसंयता अपि। नारका न संयता, असंयताः, न संयतासंयताः, न नोसंयतनोऽसंयताः। एवं देवा अपि तिर्यञ्चः

संयतासंयता अपि। मनुष्याः संयता अपि।

(३३) **ज्ञानपरिणामपदम्** - द्विविधोऽवधिः **भवप्रत्ययिकः** - देवनारकाणाम्, **क्षायोपशमिकः** - मनुष्यतिरश्चाम्। नारकाणामवधिज्ञेयक्षेत्रम् - जघ० १/२ गव्यूतम्, उत्कृ० ४ गव्यूतानि। नारकभेदानामन्येषां चावधिज्ञेयक्षेत्रं भगवत्युपनिषद्वज् ज्ञेयम्।

| **जीवाः** | **अवधिसंस्थानम्** |
|---|---|
| नारकाः | तप्राकारः |
| असुरादयः | पल्यकः |

| जीवाः | अवधिसंस्थानम् |
| --- | --- |
| पञ्चे० ति० | नानासंस्थानम् |
| मनुष्याः | नानासंस्थानम् |
| १-१२ कल्पः | ऊर्ध्वमृदङ्गाकारः |
| ग्रैवेयकदेवाः | पुष्पचङ्गेरी |
| अनुत्तरदेवाः | यवनालिका |

| जीवाः | अवधेः |
| --- | --- |
| नारकाः | अन्तः |
| देवाः | अन्तः |
| पञ्चे० ति० | बहिः |
| मनुष्याः | अन्तरपि बहिरपि |

| जीवाः | अवधिः |
| --- | --- |
| नारकाः | देशावधिः |
| देवाः | देशावधिः |
| पञ्चे० ति० | देशावधिः |
| मनुष्याः | देशावधिरपि सर्वावधिरपि |

नारकाणामवधिरानुगामिकोऽप्रतिपात्य-वस्थितः। एवं देवानामपि। शेषाणां षड्विधोऽपि।

(३४) **प्रवीचारपरिणामपदम्** - नारका अनन्तराहाराः, ततो निर्वर्तना, ततः पर्यादानम्, ततः परिणामनम्, ततः

परिचारणा, ततो विकुर्वणा। एवं पञ्चे. ति. वायुकायिका मनुष्याश्च। देवा अनन्तराहाराः, ततो निर्वर्तना, ततः पर्यादानम्, ततः परिणामनम्, ततो विकुर्वणा, ततः परिचारणा। यतस्ते विशिष्टशब्दाद्युपभोगवाञ्छायां पूर्वमिष्टं वैक्रियरूपं कुर्वन्ति, पश्चात् शब्दाद्युपभोगमित्येष नियमः। शेषास्तु शब्दाद्युपभोगसम्पत्तौ सत्यां हर्षवशात् विशिष्टतरशब्दाद्युपभोगवाञ्छातोऽन्यतो वा कुतश्चित् कारणवशाद्विकुर्वते, ततस्तेषां पूर्वं प्रवीचारणा पश्चाद्विकुर्वणा। पृथ्वीकायिकादेरप्येवम्, नवरं न तेषां

विकुर्वणा।

नारका यान् पुद्गलानाहारतया गृह्णन्ति, तान् न जानन्ति, न पश्यन्त्याहारयन्ति।

एवं यावत्त्रीन्द्रियाः। चतुरिन्द्रिया एके न जानन्ति पश्यन्त्याहारयन्ति, एके न जानन्ति न पश्यन्त्याहारयन्ति। पञ्चे०ति० एके जानन्ति पश्यन्ति आहारयन्ति, एके जानन्ति न पश्यन्ति आहारयन्ति, एके न जानन्ति पश्यन्ति आहारयन्ति, एके न जानन्ति न पश्यन्ति आहारयन्ति। एवं मनुष्या अपि।

वानमन्तरज्योतिष्का नारकवत्।

वैमानिकेषु ये सदृशस्ते जानन्ति पश्यन्ति आहारन्ति। मिथ्यादृशस्तु न जानन्ति न पश्यति आहारन्ति। नारकादीनामसङ्ख्येयान्यध्यवसानानि। नारकादयः सम्यक्त्वाधिगामिनोऽपि, मिथ्यात्वाधिगामिनोऽपि, सम्यग्मिथ्यात्वाधिगामिनोऽपि। नवरमेकेन्द्रिया विकलाश्च न सम्यक्त्वाधिगामिनः, मिथ्यात्वाधिगमिनः, न सम्यङ्मिथ्यात्वगामिनः।

| | |
|---|---|
| आ ईशानाद्देवाः | सदेवीकाः सपरिचाराः |
| ३-१२ कल्पः | अदेवीकाः सपरिचाराः |
| ग्रैवे० अनु० | अदेवीकाः अपरिचाराः |

पञ्चविधाः परिचारणा-कायपरिचारणा, स्पर्शपरिचारणा, रूपपरिचारणा, शब्दपरिचारणा, मनःपरिचारणा।

| | |
|---|---|
| आ ईशानात् | कायपरिचारणा |
| ३-४ | स्पर्शपरिचारणा |
| ५-६ | रूपपरिचारणा |
| ७-८ | शब्दपरिचारणा |

| | |
|---|---|
| ९-१२ | मनःपरिचारणा |
| ग्रैवे० अनु० | अपरिचारणा |

देवानां शुक्रपुद्गला देवीनां श्रोत्रादितयेष्टतया सौभाग्यरूपयौवनलावण्यगुणतया च परिणमन्ति।

| देवाः | अल्प० |
|---|---|
| अपरिचारकाः | सर्व० |
| मनःपरिचारकाः | सङ्ख्येय० |
| शब्दपरिचारकाः | अस० |
| रूपपरिचारकाः | अस० |

| देवाः | अल्प० |
|---|---|
| स्पर्शपरिचारकाः | अस० |
| कायपरिचारकाः | अस० |

(३५) **वेदनापदम्** - त्रिविधा वेदना - शीता, उष्णा, शीतोष्णा

| नारकाः | शीता, उष्णा |
|---|---|
| रत्नप्रभानारकाः | उष्णा |
| शर्कराप्रभानारकाः | उष्णा |
| वालुकाप्रभानारकाः | उष्णा |
| पङ्कप्रभानारकाः | शीता,उष्णा (बहुतराणाम्) |
| धूमप्रभानारकाः | शीता(बहुतराणाम्), शीता |

| नारकाः | शीता, उष्णा |
| --- | --- |
| तमःप्रभानारकाः | शीता |
| तमस्तमःप्रभानारकाः | शीता |
| देवाः | शीता, उष्णा, शीतोष्णा |
| तिर्यञ्चः | शीता, उष्णा, शीतोष्णा |
| मनुष्याः | शीता, उष्णा, शीतोष्णा |

यद्वा त्रिविधा वेदना-शारीरी, मानसी, शारीरमानसी। एकेन्द्रियविकलानां शारीरी। शेषाणां त्रिविधाऽपि। यद्वा त्रिविधा वेदना - साता, असाता, सातासाता। सर्वेषां त्रिविधाऽपि।

यद्वा - सुखा, दुःखा, सुखदुःखा। सर्वेषां त्रिविधाऽपि।

यद्वा द्विविधा - आभ्युपगमिकी, औपक्रमिकी च। मनुष्याणां पञ्चे. तिरश्चां च द्विविधाऽपि। शेषाणामेकविधैव, तेषां कर्मक्षपणार्थं वेदनाभ्युपगमाभावात्। यद्वा द्विविधा निदा - चित्तवती। विवेकवती, अनिदा चित्तविकला, विवेकविकला च। यथायोगं वाच्या।

(३६) **समुद्घातपदम्** - समुद्घाताः सप्त - वेदनादयः। केवलिसमुद्घातः -

अष्टसामयिकः, शेषाः - असङ्ख्येयसमया आन्तमौहूर्त्तिकाः

| जीवाः | समुद्धाताः |
|---|---|
| वायुकायः | ४ वेदना० कषाय०, मरण०, वैक्रिय० |
| शेषैकेन्द्रियाः | ३ वेदना० कषाय०, मरण०, |
| विकलाः | ३ वेदना० कषाय०, मरण०, |
| नारकाः | ४ वेदना० कषाय०, मरण०, वैक्रिय० |
| देवाः | ५ वेदना० कषाय०, मरण०, वैक्रिय० तैज० |
| पञ्चे.तिर्यञ्चः | ५ वेदना० कषाय०, मरण०, वैक्रिय० तैज० |
| मनुष्याः | ७ |

प्रत्येकनारकस्यानन्ता वेदनासमुद्धाता

अतीताः। पुरस्कृताः केषाञ्चित् सन्ति, केषाञ्चिन् न। येषां सन्ति तेषां जघन्यत १/२/३/ सङ्ख्येयाः / असङ्ख्येयाः / अनन्ताः। एवं देवस्य तिरश्चः मनुष्यस्य च वाच्यम्, यावत् तेजःसमुद्घाताः।

प्रत्येकनारकस्यातीताऽऽहारकसमुद्घाताः? कस्यचित् सन्ति, कस्यचिन्न। यस्यास्ति तस्य १।२।३। पुरस्कृता यस्य सन्ति तेषां १।२।३।४। एवमन्येषामपि। नवरं मनुष्येषु यस्यातीताः सन्ति तस्य १।२।३।४। पुरस्कृता यस्य सन्ति तस्य १।२।३।४। यश्चतुर्थवेलमाहारकशरीरं करोति, स

तद्भव एव मुक्तिमासादयति।

प्रत्येकनारकस्यातीताः केवलिसमुद्घाता न सन्ति। पुरस्कृतो यस्य तस्यैकः। एवं सर्वस्य। नवरं मनुष्यस्य यस्यातीतोऽस्ति तस्यैकः, एवं पुरस्कृतोऽपि।

एवं नारकादिसमुदायमाश्रित्यापि यथायोगं वाच्यम्। प्रत्येकनारकस्य नारकत्वे कियन्तो वेदनासमुद्घाता अतीता इत्यादिसंवेधश्च ज्ञेयः श्रुतानुसारेण।

| जीवाः | अल्प० |
|---|---|
| आहारकसमुद्घातेन समुद्धताः | सर्व० |
| केवलिसमुद्घातेन समुद्धताः | सङ्ख्येय० |
| तैजससमुद्घातेन समुद्धताः | अस० |
| वैक्रियसमुद्घातेन समुद्धताः | अस० |
| मारणान्तिकसमुद्घातेन समुद्धताः | अनन्तगुणाः |
| कषायसमुद्घातेन समुद्धताः | अस० |
| वेदनासमुद्घातेन समुद्धताः | विशे० |
| असमवहताः समुद्घातेन समुद्धताः | अस० |

| नैरयिकाः | अल्प० |
| --- | --- |
| मारणान्तिकसमुद्धातेन समुद्धताः | सर्व० |
| वैक्रियसमुद्धातेन समुद्धताः | अस० |
| कषायसमुद्धातेन समुद्धताः | सङ्ख्येय० |
| वेदनासमुद्धातेन समुद्धताः | सङ्ख्येय० |
| असमवहताः | सङ्ख्येय० |

| असुरादयः | अल्प० |
| --- | --- |
| तैजससमुद्धातेन समुद्धताः | सर्व० |
| मारणान्तिकसमुद्धातेन समुद्धताः | अस० |
| वेदनासमुद्धातेन समुद्धताः | अस० |
| कषायसमुद्धातेन समुद्धताः | सङ्ख्येय० |

| असुरादयः | अल्प० |
|---|---|
| वैक्रियसमुद्धातेन समुद्धताः | सङ्ख्येय० |
| असमवहताः | अस० |
| एवं वानमन्तराः, ज्योतिष्काः, वैमानिकाश्च | |

| पृथ्वीकायिकाः | अल्प० |
|---|---|
| मारणान्तिकसमुद्धातेन समुद्धताः | सर्व० |
| कषायसमुद्धातेन समुद्धताः | सङ्ख्येय. |
| वेदनासमुद्धातेन समुद्धताः | विशे० |
| असमवहताः | अस० |

एवं यावद्वनस्पतिकायिकाः नवरं-

| वायुकायिकाः | अल्पबहुत्वम् |
|---|---|
| वैक्रियसमुद्धातेन समुद्धताः | सर्व० |
| मारणान्तिकासमुद्धातेन समुद्धताः | अस० |
| कषायसमुद्धातेन समुद्धताः | सङ्ख्येय० |
| वेदनासमुद्धातेन समुद्धताः | विशे० |
| असमवहताः | अस० |
| **विकलाः** | **अल्प०** |
| मारणान्तिकसमुद्धातेन समुद्धताः | सर्व० |
| वेदनासमुद्धातेन समुद्धताः | अस० |
| कषायसमुद्धातेन समुद्धताः | अस० |

| विकलाः | अल्प० |
|---|---|
| असमवहताः | सङ्ख्येय० |

| पञ्चे० तिर्यञ्चः | अल्प० |
|---|---|
| तैजससमुद्घातसमुद्धताः | सर्व० |
| वैक्रियसमुद्घातसमुद्धताः | अस० |
| मारणान्तिकसमुद्घातसमुद्धताः | अस० |
| वेदनासमुद्घातसमुद्धताः | अस० |
| कषायसमुद्घातसमुद्धताः | सङ्ख्येय० |
| असमवहिताः | सङ्ख्येय० |

| मनुष्याः | अल्प० |
|---|---|
| आहारकसमुद्धातसमुद्धताः | सर्व० |
| केवलिसमुद्धातसमुद्धताः | सङ्ख्येय० |
| तैजससमुद्धातसमुद्धताः | सङ्ख्येय० |
| वैक्रियसमुद्धातसमुद्धताः | सङ्ख्येय० |
| मारणान्तिकसमुद्धातसमुद्धताः | अस० |
| वेदनासमुद्धातसमुद्धताः | अस० |
| कषायसमुद्धातसमुद्धताः | सङ्ख्येय० |
| असमवहताः | अस० |

**वेदनासमुद्धातेन** समवहतो जीवो यान् पुद्गलान् निक्षिपति, तैः पुद्गलैः

शरीरप्रमाणं नियमाद्दिक्षट्केऽपि व्याप्तं भवति क्षेत्रम्। तच्च १/२/३ समयिक-विग्रहेण व्याप्तं भवति। तान् पुद्गलान् जघन्यतोऽन्तर्मुहूर्त्तं यावत्, उत्कृष्टतोऽपि चान्तर्मुहूर्त्तम्। ते पुद्गलास्तत्र यज्जीवानाम-भिघातादि कुर्वन्ति, तेभ्यः स जीवः ३/४/५ क्रियाः। ते जीवास्ततो जीवात् ३/४/५ क्रियाः। स जीवस्ते जीवाश्चान्येषां जीवानां परम्पराघातेन ३/४/५ क्रियाः।

एवं **कषायसमुद्धात**माश्रित्यापि ज्ञेयम्। **मारणान्तिकसमुद्धा**तेऽयं विशेषः - विष्कम्भबाहल्याभ्यां शरीरप्रमाणम्,

आयामेन जघन्येनाऽङ्गुलस्यासङ्ख्येय-भागम्, उत्कृष्टेनैकदिश्यसङ्ख्येय-योजनानि, एतावत्क्षेत्रं व्याप्तम्। विग्रहः १/२/३/४ समयिकः। नारकस्य त्वयामेन जघन्येन साधिकं योजनसहस्रम्, उत्कृष्टेना-सङ्ख्येययोजनान्येकदिशि। विग्रहः २/३/४ समयिकः। एवं शेषाणामपि। नवरं एके-न्द्रियस्य १/२/३/४ समयिको विग्रहः।

**वैक्रियसमुद्घाते** विशेषः - आयामो जघ० अङ्गुलासङ्ख्येयभागः, उत्कृ० सङ्ख्येययोजनानि एकदिशि/विदिशि। विग्रहः १/२/३ समयिकः। नारकस्या-

यामो जघ० असङ्गुलस्यासङ्ख्येयभागः, उत्कृ० सङ्ख्येयानि योजनान्येकदिशि। देवमनुष्याणां एकदिशि / विदिशि।

**तैजसमुद्घाते** विशेषः - आयामो जघ० अङ्गुलासङ्ख्येयभागः। पञ्चे० तिरश्च एकदिशि। शेषं वैक्रियवत्।

**आहारकसमुद्घाते** विशेषः - आयामः- जघ० अङ्गलासङ्ख्येयभागः, उत्कृ० सङ्ख्येय०योजनान्येकदिशि। विग्रहः १/२/३ समयिकः।

**केवलिसमुद्घातप्रक्रिया** जीवाभि-

गमवन्नेया यावत् सिद्धिगमनं सिद्धस्वरूपं च।

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु कृतकृपा बहुश्रुताः। सञ्चयोऽयमाचार्य-कल्यामबोधेः कर्मारिशून्यनेत्रे वैक्रमेऽब्दे (वि.सं.२०६८) ज्येष्ठासितत्रयोदश्यां वडोदरा-उपनगर-सुभानपुरास्थिते बालुबा आराधनाभवने सम्पन्न इति शम्।

તારું છે આકાશ ને
છે તારી આ પાંખ।
અવસર આ અણમોલ છે
ખોલી દે ને આંખ।।

- અનુભૂતિગીતા

## DON'T MISS IT

# પ્રવ્રજ્યાનું પાથેય




## ગુરુ પદ્મની પરિમલગાથા

રચનાકાર

**બહુશ્રુત મુનિરાજશ્રી રત્નબોધિવિજયજી મ.સા.**

## શ્રીસંઘના કરકમળમાં
## નવલું નજરાણું




લેખક

**શિલ્પજ્ઞ મુનિરાજશ્રી સૌમ્યરત્નવિજયજી મ.સા.**

સ્પર્શ તો અગ્નિસ્પર્શ છે
કરશે ભસ્મીભૂત
આતમ છેતરવા તને
મોહ તણું એ તૂત

- અનુભૂતિગીતા

*Don't Miss it.*




મૂળવિવેચનકાર

**પ.પૂ.આ. શ્રીભુવનભાનુસૂરીશ્વરજી**

સંસ્કૃતતાત્પર્યાનુવાદકાર

**પ.પૂ.આ. શ્રીકલ્યાણબોધિસૂરિજી**

લાભાર્થી

## શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ

એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી (પૂર્વ), મુંબઈ.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરિ ભૂરિ અનુમોદના